Shree Swaminarayan Gurukul, Zundal

| SUMMATIVE ASSIGNMENT -3 | |
|---|---|
| GRADE-**VIII** | SUBJECT – SANSKRIT |
| SYLLABUS – LESSON-9-10 | |

## अपठित-अवबोधनम

## प्र-1 अधोदतं प्रत्येकं अनुच्छेदं पठित्वा प्रश्नान उत्तरत लिखत-

प्रातः काल अति सुखकरः भवति। खगाः मधुरं कूजन्ति। उद्यानेषु पुष्पाणि विकसन्ति। पवनः सुगन्धः शुद्धः च अस्ति। जनाः भ्रमणाय व्यायामाय वा गच्छन्ति। यदा पूर्वस्यां दिशायाम् सूर्यः उदयं गच्छति तदा क्षितिजस्य शोभा दर्शनीया भवति। एतत् मनोहरं दृश्यम् दृष्ट्वा चित्तम् प्रसन्नम् भवति। प्रातः सर्वे जनाः स्व-स्व-कार्यम् उल्लासेन कुर्वन्ति। परम् अलसाः सुप्ताः सन्ति। छात्राः प्रसन्नमुखेन विद्यालयम् पठनाय गच्छन्ति। सर्वे नवजीवनम् अनुभवन्ति।

I. एकपदेन उत्तरम्

1. प्रात:काल कीदृशः भवति? ……………………………………..
2. के मधुरं कुजन्ति? ……………………………………..
3. जनाः किमर्थम् गच्छन्ति? ……………………………………..
4. सर्वे किम् अनुभवन्ति? ……………………………………..

उत्तरम्:

1. सुखकरः,
2. खगाः,
3. भ्रमणाय/व्यायामाय,
4. नवजीवनम्

II. एकवाक्येन उत्तरम्

छात्राः प्रातः किम् कुर्वन्ति?

उत्तरम्:-छात्रा: प्रात: विद्यालयम् पठनाय गच्छन्ति।

III. 1. 'पूर्वस्यां दिशायाम्'-अत्र किम् विशेषणपदम्?

2. यथानिर्देशम् उत्तरत-

(क) कुर्वन्ति = …………………. धातुः, …………………. लकारः …………………., पुरुषः ………………….

वचनम्

(ख) दृष्ट्वा = ...................... धातुः, ...................... प्रत्ययः

(ग) पठनाय = ...................... विभक्तिः , ...................... वचनम्।

(घ) नवजीवनम् = ...................... विभक्तिः , ...................... वचनम्

3. विलोमपदं लिखते

(क) पश्चिमायाम् = ......................

(ख) अस्तं गच्छति = ......................

4. समानार्थकं पदम् लिखत

(क) सुन्दरम् = ......................

(ख) रविः = ......................

5. एकवचने परिवर्त्य वाक्यं पुनः लिखत

(क) उद्यानेषु पुष्पाणि विकसन्ति। ......................

(ख) खगाः मधुरं कूजन्ति। ......................

उत्तरम्:

1. पूर्वस्याम् ।

2. (क) कृ धातुः, लट् लकारः, प्रथमः पुरुषः, बहुवचनम्

(ख) दृश् धातुः, क्त्वा प्रत्ययः

(ग) चतुर्थी विभक्तिः एकवचनम्

(घ) द्वितीया विभक्तिः एकवचनम्।

3. (क) पूर्वस्याम्

(ख) उदयं गच्छति

4. (क) मनोहरम्

(ख) सूर्यः

5. (क) उद्याने पुष्पं विकसति।

(ख) खगः मधुरं कूजति।

रामायणम् महाभारतम् च द्वे महाकाव्ये संस्कृत-साहित्यस्य। एतौ ग्रन्थौ भारतीय-संस्कृतेः आधारस्तम्भौ। आदिकाव्यं रामायणम् ऋषेः वाल्मीकेः रचना अस्ति। इदम् काव्यम् अष्टेषु अध्यायेषु वर्तते। ऋषिः वाल्मीकिः आदिकविः कथ्यते । महाभारतस्य रचयिता ऋषिः वेदव्यासः । महाभारतं नाम महाकाव्यम्। विश्व-कोषः इति कथ्यते। 'यत् इह अस्ति न तत् अन्यत्र' इति मन्यते । अयं ग्रन्थः शतसहस्र-श्लोकेषु निबद्धः। विश्व-प्रसिद्ध श्रीमद्भगवद्गीता अस्य महाकाव्यस्य अंशः अस्ति। गीतायाम् श्रीकृष्णः अर्जुनाय उपदिशति-'कर्तव्य-भावेन स्वकर्त्तव्यं कुरु, कर्म-फलस्य आशाम् मा कुरु'। एषः उपदेशः जनानां हितकरः।।

## I. एकपदेन उत्तरत।

1. रामायणं कस्य रचना ?

उ-रामायणम् ऋषेः वाल्मीकेः रचना

2. ऋषिः वेदव्यासः कस्य रचयिता ?

उ- महाभारतस्य रचयिता ऋषिः वेदव्यासः

3. कः आदिकविः कथ्यते ?

उ- ऋषिः वाल्मीकिः आदिकविः कथ्यते ।

4. किं नाम महाकाव्यं विश्वकोषः कथ्यते ?

उ-

## II. एकवाक्येन उत्तरत।

1श्रीकृष्णः अर्जुनाय किम् उपदिशति ?

उ- श्रीकृष्णः अर्जुनाय उपदिशति-'कर्तव्य-भावेन स्वकर्त्तव्यं कुरु, कर्म-फलस्य आशाम् मा कुरु'

## प्र-2- पाठात् चित्वा तद्भवपदानां कृते संस्कृतपदानि लिखत–

| | तद्भव – पदानि | संस्कृत – पदानि |
|---|---|---|
| यथा | सात | सप्त |
| (क) | बहिन | भगिनी |
| (ख) | संगठन | समवाय |
| (ग) | बाँस | वंश |

| | | |
|---|---|---|
| (घ) | आज | अद्य |
| (ङ) | खेत | क्षेत्रम् |

## प्र-3-भिन्नप्रकृतिकं पदं चिनुत-

(क) गच्छति, पठति, धावति, अहसत्, क्रीडति।

(ख) छात्रः, सेवकः, शिक्षकः, लेखिका, क्रीडकः।

(ग) पत्रम्, मित्रम्, पुष्पम्, आम्रः, फलम्, शाखा।

(घ) व्याघ्रः , भल्लूक :, गजः, कपोत :, वृषभः, सिंहः।

(ङ) पृथिवी, वसुन्धरा, धरित्री, यानम्, वसुधा।

## प्र-4-विशेष्य – विशेषणानाम् उचितं मेलनम् कुरूत –

| विशेष्य – पदानि | विशेषण – पदानि |
|---|---|
| अयम् | प्रदेश: |
| संस्कृतिविशिष्टायाम् | भारतभूमौ |
| महत्त्वाधायिनी | संस्कृति: |
| प्राचीने | इतिहासे |
| एक: | समवाय: |

## प्र-5-संस्कृतभाषयां वाक्यप्रयोगं कुरुत–

(क) विद्या - विद्याविहीनः पशुभिः समानः।

(ख) तपः - ग्रामं निकषा तपश्चरति तापसः।

(ग) समाचरेत् - नित्यं गुरुसेवां समाचरेत्।

(घ) परितोषः - सन्ततेः सार्थकतायां पित्रोः सन्तोषः सञ्जायते।

(ङ) नित्यम् - पठामि संस्कृतं नित्यम्।

## प्र–5 शुद्धवाक्यानां समक्षम् आम् अशुद्धवाक्यानां समक्षं च नैव इति लिखत–

(क) अभिवादनशीलस्य किमपि न वर्धते। (क) न

(ख) मातापितरौ नृणां सम्भवे कष्टं सहेते। (ख) आम्

(ग) आत्मवशं तु सर्वमेव दुःखमस्ति। (ग) न.

(घ) येन पितरौ आचार्यः च सन्तुष्टाः तस्य सर्वं तपः समाप्यते। (घ) आम्
(ङ) मनुष्यः सदैव मनः पूतं समाचरेत्। (ङ) आम्
(च) मनुष्यः सदैव तदेव कर्म कुर्यात् येनान्तरात्मा तुष्यते। (च) आम्

## प्र-6 समुचितपदेन रिक्तस्थानानि पूरयत–

(क) मातापित्रेः तपसः निष्कृतिः ................ कर्तुमशक्या। (दशवर्षैरपि/षष्टिः वर्षैरपि/**वर्षशतैरपि**)।

(ख) नित्यं वृद्धोपसेविनः ................ वर्धन्ते (**चत्वारि**/पञ्च/षट्)।

(ग) त्रिषु तुष्टेषु ................ सर्वं समाप्यते (जपः/**तप**/कर्म)।

(घ) एतत् विद्यात् ................ लक्षणं सुखदुःपयोः। (शरीरेण!**समासेन**/विस्तारेण)

(ङ) दृष्टिपूतम् न्यसेत् ................। (हस्तम्/**पादम्**/मुखम्)

(च) मनुष्यः मातापित्रोः आचार्यस्यय च सर्वदा ........... कुर्यात्। (**प्रियम्**/अप्रियम्/अकार्यम्)

## प्र-7प्रश्नानाम् उत्तराणि एकपदेन लिखत –

(क) अस्माकं देशे कति राज्यानि सन्ति?
**उत्तर**– अष्टविंशतिः

(ख) प्राचीनेतिहासे काः स्वाधीनाः आसन्?
**उत्तर**–सप्तभगिन्यः

(ग) केषां समवायः 'सप्तभगिन्यः' इति कथ्यते?
**उत्तर**– सप्तराज्यानाम्।

(घ) अस्माकं देशे कति केन्द्रशासितप्रदेशाः सन्ति?
**उत्तर**– सप्त।

(ङ) सप्तभगिनी प्रदेशे कः उद्योगः सर्वप्रमुखः?
**उत्तर**– वंशोद्योगः।

## प्र–8-पूर्णवाक्येन उत्तराणि लिखत–

(क) भगिनीसप्तके कानि राज्यानि सन्ति?

**उत्तर**–भगिनीसप्तके सप्त राज्यानि सन्ति।

(ख) इमानि राज्यानि सप्तभगिन्यः इति किमर्थं कथ्यन्ते?

**उत्तर**–सप्तराज्यसमूहत्वात् इमानि राज्यानि सप्तभगिन्यः इति कथ्यन्ते।

(ग) सप्तभगिनी – प्रदेशे के निवसन्ति?

**उत्तर**–सप्तभगिनीप्रदेशे गारो – खासी – नगा- मिजोप्रभृतयः बहवः जनजातीयाः निवसन्ति।

(घ) एतत्प्रादेशिकाः कैः निष्णाताः सन्ति?

**उत्तर**–एतत्प्रदेशिकाः स्वलीलाकलाभिः निष्णाताः।

(ङ) वशंवृक्षवस्तूनाम् उपयोग : कुत्र क्रियते?

**उत्तर**–आवस्त्रभूषणेभ्यः गृहनिर्माणपर्यन्तं प्रायः सर्वत्र वंशवृक्षवस्तूनाम् उपयोगः क्रियते।

प्र-9- रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत–

(क) वयं <u>स्वदेशस्य</u> राज्यानां विषये ज्ञातुमिच्छामि |

**उत्तर**–वयं कस्य राज्यानां विषये ज्ञातुमिच्चामः?

(ख) <u>सप्तभगिन्यः</u> प्राचीनेतिहासे प्रायः स्वाधीनाः एव दृष्टाः |

**उत्तर**–काः प्राचीनेतिहासे प्रायः स्वाधीनाः एव दृष्टाः?

(ग) प्रदेशेऽस्मिन् <u>हस्तशिल्पानां</u> बाहुल्यं वर्तते |

**उत्तर**–प्रदेशेऽस्मिन् केषाण् बाहुल्यं वर्तते?

(घ) एतानि राज्यानि तु भ्रमणार्थं <u>स्वर्गसदृशानि</u> |

**उत्तर**– एतानि राज्यानि भ्रमणार्थं कीदृशानि?

---------------------------------------------